No. २१९५

Title परमार्थसारः सटीकः

Author अभिनवगुप्तः योगराजः

Extent ४८ Age ४

Subject भक्तिशास्त्रं

2175

E. 3 48

Page No. 30 double
Page No. 31 Missing

परमार्थसार: सटीक:

४८ पत्र

२२८५

ॐ

ॐ ॐ श्री शिवाय नमः ॥ ॐ नमः सरस्वत्यै ॐ विश्वोपि जगन्मूर्त्तीशपानो यः स जयत्यजः
प-टी- स्वात्मप्रच्छादने क्रीडाविदग्धः परमेश्वरः योयं व्यधायि गुरुणा युक्त्या परमार्थसारसंक्षेपः
१ विवृतिं करोमि मलहीमस्मिन्निह हृत्तमोर्थितो योगः इह शिवाद्वयशासने देहादिप्रमातृता
प्राधान्यसंकल्पसमुत्थशंकातंकालस्य संशयादिरूपविघ्नौघप्रसरध्वंसपूर्विकां शा
स्त्रनिष्पत्तिं मन्यमानः परिमितप्रमातृताधर्माद्याकारेण चिदानंदैकघनस्वात्मदेव
तासमावेशशालिनीं समस्तशास्त्रार्थसंक्षेपगर्भां प्रथमतस्तावत्परमेश्वरप्रवणतो प्रमातृप्रमेयरूपस्य
सामंतमायावरणं परामृषति ॐ परं परस्थं गहनादनादिमेकं निविष्टं बहुधा गुहासु सर्वालयं सर्वचराचर जगतो विश्रान्तिस्थानं ॥
शालं संश्रये स्थं त्वामेव शंभुं शरणं प्रपद्ये १ त्वां सर्वप्रमातृस्फुरत्तासारस्वात्मदेवतारूपमेव शंभुमनु जगज्जडविश्वरूपतया निष्ठंतं।
स्वा- त्तमं श्रये स्वभावसत्तात्मकं शरणं त्राणं त्वत्समावेशसमापत्त्ये संश्रये एवकारः शंभुस्वात्म
देवताकारमेव प्रपद्ये न पुनर्मायान्तर्वर्तिनं केचिद्भिन्नं देवमित्यन्ययोगव्यवच्छित्तिं
अन्यच्च किंभूतं परं पूर्णं चिदानंदैकात्मानं क्रियाशक्तिनिर्भरमनुत्तरस्वरूपं तथा पर

स्येगहनादिति गहनान्मायाभिधानात्तत्वान्तरस्मिन्नरणएव शिवादिविद्यातत्वपर्यंते शुद्धाध्व
तस्यप्रच्यवस्तुङ्गा सिन्नान्या द्वर्षो=२ नि स्वरूपे तिष्ठते न पुनस्तत्तदवस्थावैचित्र्येणापि स्फुरतस्तातः परस्मात्पूर्णात्स्वरूपात्तस्य प्रच्यवो भ
वति यदुक्तं जाग्रदादिविभेदेपि तदभिन्ने प्रसर्पति निवर्तते निजान्नैव स्वरूपादुपलब्धृतेति स्पंद
शास्त्रे अनादिं पुराणं सर्वप्रतीतीनामनुभवितृतया प्रमातृत्वेनानादिसिद्धत्वात् एकमित्यसहाय
चिदेकेन स्फुरणात् भेदस्यानुपपत्तेः तथानिविष्टमित्यादि एवंजातीयमपि स्वस्वातंत्र्येण बहुधा
नानाप्रकारैर्भेदैर्ब्रह्मरुद्रेन्द्रतत्तद्रूपात्मक्षुद्रास्वतयाविष्टं चेतनरूपेणि स्वयेजडाजडात्मनामाभा न्ग
माना स्यानत्वं प्रमातृतया स्थित इति यावत् अत एव सर्वालयमिति सर्वस्य रुद्रदेवादिप्रमातृप्रमेय तं
रूपस्य जगत आलये विश्रांतिस्थाने सर्वमिदं किल पूर्णप्रमातरि स्थितं सद्ग्राह्यग्राहकयुगला
पेक्षया उन्मग्नमिव भेदेन प्रकाशमानं नानारूपैर्विपरिवर्तते अन्यथैतत्प्रकाशाद्भिन्नस्य स सर्वज्ञत्वसर्वकर्तृ
त्त्वैव न स्यात् अतइदं विश्वमिति सर्वनामप्रत्यवमर्शः नैतावता भगवतः सर्वसंकीर्णस्व त्वादिगुणगणयु
रूपमित्याह सर्वचराचरस्यमिति सर्वमिदं यत्नडाजडस्वभावं विश्वं तद्रूपतया तिष्ठते क कालद्रुप्रमातारः द्रद्राद्याः पितामहा नाघटपटादिपदा
र्यमात्रज्ञानयुक्ताः हेत्रस्त्राश्रस्सदादयः येपञ्चावरणमुच्यंते=५

एतस्य जगतः प्रकाशाद्भिन्नस्येत्यन्यादृष्टो=२

प-टी-
२ तोऽस्मि सर्वस्य यतः स्वयमेव विभाति ततः सर्वमिदं त्वमेवेति न्यायेन हि व्यतिरिक्तस्यान्यस्याप्रकाश्य-
मानस्य कार्यत्वानुपपत्तेः। भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थित इति भगवानेव तथा तथा चका-
स्ति इत्येवं एवंविधं त्वामनुत्तरं सर्वस्य स्वात्मदेवतात्मस्वरूपं पराद्वैतचमत्कारसारमपि गृहीतनाना-
त्वमथ चात्मनाखेदितं स्वस्वातन्त्र्यपरमाद्वयप्रकाशस्वरूपं भगवन्तं शंभुं प्रपद्ये शरीरादिरूढि-
मादृंकारग्रहणीकारेणाह शंत्वामेव स्वात्मानं पराद्वैतचमत्कारस्वरूपं समाविशामीति यावत्
अनेन ग्रहणकवाक्येन परमोपादेयात्मस्वभावसमावेशमयीं दशामुपदिशता गुरुणा वक्ष्य-
ख्यापितः माणाद्वयोपादेयतया सकलग्रन्थार्थोपक्षेपः कृतः॥ एवं प्रकारेण तात्पर्यमुद्देशस्वरूपं
स्तुतिद्वारेण प्रतिपाद्येदानीं शास्त्रावतारमभिदधत्संबन्धाभिधेयादियं प्रयोजनादार्यद्वयेनाह ।१ कथं ग्रन्थकारः आर्याद्वयमादर्शे=४
गर्भादिवासपूर्वकमरणान्तकदुःखचक्रविभ्रान्तः। आधारं भगवन्तं शिष्यः पप्रच्छ परमार्थम्॥
आधारकारिकाभिस्तं गुरुरभिभाषते स्म तत्सारं। कथयत्यभिनवगुप्तः शिवशासनदृष्टियो-
गेन॥ कश्चिद्भगवत्प्रसादात्समुत्पन्नवैराग्यः संसाराद्विरतमतिः गुरोः शासनीयोऽस्मीति

मत्वा सकुदुमाधारं भगवंतं शेषाख्यं मुनिं सम्यगाराध्य परमार्थोपदेशं स्वत्रं पृष्टवान् तदात
योग्यतापरिपाकस्वरूपपरिशीलनक्रमेण तं शिष्यं विगलितान्तःकरणं मत्वा सोप्यनन्तनामा योनिः
शेषशास्त्रोपदेशज्ञः परमार्थसारनाम्नाधारकारिकाभिरित्यपराभिधानग्रंथेन सांख्यनयो
क्तोपदेशानुसारेण प्रकृतिपुरुषविवेकज्ञानात्परब्रह्मावाप्तिरित्येवमेनं शिष्यं प्रोक्तवान्
अस्यावेवब्रह्मोपदेशः परमाद्वयस्वरूपप्रकाशनेनाद्यदृष्ट्या प्रतिपादितः सन्युक्तियुक्तो भवतीति म ति
त्वा सर्वजनमनुग्रहीतुं परमाद्वयशैवनययुक्त्या गुरुरभिनवेनालोकितेन चित्तचमत्कारस्फारे
ण गुम्फिताः सरहस्य इति सोयं९णपनामात्तगावलिसत्सारं तस्य परमोपदेशस्य यत्सारं वै
दध्नो नवनीतमिवोपादेयं परानुग्रहप्रवृत्तः सन्प्रतिपादयतीत्येवं संबंधाभिधे
३ याभिधानप्रयोजनान्यत्र उपपादितानि नेह पुनः शास्त्रगौरवभयात्प्रतन्यंते
कीदृशः स शिष्य इत्याह गर्भाधिवासेति गर्भाधिवासप्रारंभं जायतेऽस्ति।

भागानां विकारप्रवनेमिम्बक्रधारा=१

प॰टी॰ २ वर्धतेविपरिणामत्यपक्षीयतेविनश्यतीतिनमद्वस्थावैचित्र्येणाषड्भावविकाररनेमियु
क्तंयजन्मरणांतंदुःखरूपमाविर्भवतिरोभावात्संसरणास्वभावतयाचक्रमिवचक्रंत
3 स्मिन्विभ्रांतोविपरिवर्तनः अनेनास्यप्राग्जातिस्मरणास्वभावोबोधाविर्भावोद्योतितः
अन्यथाकथंकाष्ठाप्राप्तिलक्षणांप्रश्नकृत्त्वंस्यात् एवंचयःसमुत्पन्नवैराग्यः
पारमेश्वरानुग्रहशक्तिविद्धहृदयःसमुदितसम्यग्ज्ञानतयोपदेशपात्रतामवाप्य
परमेश्वराकारंसमुचितमपिगुरुंसमासाद्यपरमाद्वयज्ञानमभिलषते सएववस्तु
तूपदेशभाजनंस्यादिति एतदेवचान्यत्रोक्तं शक्तिपातवशाद्देविनीयतेसद्गुरुंप्र
तीति इहचवस्तुस्तात्कुद्यते अधुनासमुत्पत्तिक्रमेणपीठिकाबंधंविधायवि
श्वैवैचित्र्यचित्रेस्मिञ्जगतिपारमेश्वरमनुत्तमंस्वातंत्र्यमेकमेवसंयोजनक्रिया
जनकर्तृत्वहेतुरितितच्छक्तिविकासमेवविश्वमंडचतुष्टयमत्रखिनावेस्यन्त्र

न्यमवतारयति निजशक्तिवैभवभरादण्डचतुष्टयमिदं विभागेन शक्तिर्मायाप्रकृतिः पृ
थ्वी चेति त्रिभावितं प्रभावितं प्रभुणा चिदानन्दैकघनेन प्रभुना स्वतन्त्रेण भगवता महेश्वरेणाण्डच
तुष्टयं विश्वाच्छादकत्वेन कोशरूपतया वस्तुपिण्डभूतमिदं यदुक्तं वस्तुपिण्डोऽण्डमुच्यते इति प ४
प्रभावितं प्रकाशितं भुवनकर्तृतया वा प्रयुक्तं कस्मादित्याह निजशक्तिवैभवभरादिति नि
जस्वात्मीयो योऽसावसाधारणः इच्छाद्यः शक्तिप्रपञ्चस्तस्य वैभवं विचित्रः प्रसरस्तस्य योऽसौ
भरः समुद्रेकस्तस्मादिति भगवतः किल स्वशक्तिविकासस्फारणमेव जगन्निर्माणं यदुक्तं श्रीम
ङ्गलशास्त्रे शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते शक्तयोऽस्य जगत्सर्वं शक्तिमांस्तु महेश्वरः
इति किंरूपाण्डचतुःसंख्येत्याह शक्तिरित्यादि विश्वस्य प्रमातृप्रमेयरूपस्य पराहन्ताचमत्कार
सारस्यापि स्वस्वरूपापोहनात्मा ख्यातिमयी निषेधव्यापाररूपा या पारमेश्वरी शक्तिः सैवाच्छाद
कत्वेन बन्धकतया शाक्तमण्डमित्युच्यते सदाशिवेश्वरविद्यातत्त्वपर्यन्तदलसहद्यमानमण्डत्रित
यमेतत्समन्तादभीहत्यावतिष्ठते इति कोशरूपतयैषा शक्तिरनेन शब्देन संज्ञिता एतस्मिन्नण्डे

कोनुर्पतया

प॰ टी॰ सदाशिवेश्वरावेवाधिपती अन्यच्च मलत्रयस्वभावं मोहमयं भेदैकप्रवणतया सर्वप्रमातॄणां प्रकृत्यण्डं पृथ्व्यण्डं = २
४ वेधरूपं पुंस्तत्त्वपर्यन्तदलं मायाख्यमण्डमित्युच्यते तत्रैव तत्प्रमाणमण्डद्वयमेतत् समन्तात्स्वीकृत्य णौ
५ स्थिते अस्याधिपश्चात्र गहनाभिधानो रुद्रः तथा च सत्त्वरजस्तमोमयी प्रकृतिः कार्यकारणा
त्मना परिणाममानती पशुप्रमातॄणां भोग्यरूपा स्वच्छस्वमोहरूपतया बंधयित्री प्रकृत्यभिधा
नमण्डमित्युच्यते तत्रापि महाविभूतिर्भगवान्निखिलभेदप्रधानो गुणाधिपतिः तथा पृथ्वी चैव
मनुष्यस्थावरान्तानां प्रति प्राकाररूपतया स्थूलैकैकमयी बंधयित्रीति कृत्वा पृथ्व्यण्डमुच्यते
तत्रापि चतुर्दशविधे भूतसर्गे प्रधानतया अधिपो भगवान् ब्रह्मेत्येवं परमेश्वरविजृंभितमि
दमण्डचतुष्टयं भगवतैतस्य प्रकाशितं परिस्फुरति एवमेतदेवाण्डचतुष्टयं प्रतिपाद्यात्रैव
भोग्यभोक्तृत्वप्रतिपादनपरतया विश्वस्वरूपनिरूपणाय कारिकामाह तत्रान्तर्विश्व
मिदं विचित्रतनुकरणभुवनसन्तानं भोक्ता च तत्र देही शिव एव गृहीतपशुभावः त
त्रैतेषु चतुर्ष्वण्डेष्वागमप्रसिद्धेषु विश्वमिदमेतन्मध्ये वर्तते कीदृशमित्याह विचित्रेति

रुद्रदेवत्रसभेदभिन्ना नानामुखहस्तपादादिरचनारूपास्तनवश्च आकारविशिष्टसंस्थानरूपेणाश्च
येभूतास्तथान्योन्यभेदेन भान्ति प्रायाणि करणानि चक्षुरादीनि तद्यथा रुद्रप्रमातॄणां निरतिशया
भिसर्वज्ञत्वादिगुणगणयुक्तानि तैः किल सर्वमिदमेकस्मिन्क्षणे युगपज्ज्ञायते संपाद्यते च दे
वतानां पुनरेतान्येव करणानि पारमेशनियतिशक्तिनियंत्रितानि मेनि घटादिपदार्थमात्रज्ञा
नकरणसमर्थान्येव करणानि तैः सर्वं ज्ञायते नापि क्रियते तत्रापि योगिनामति प्रायः करणा
नां यन्नियतिशक्तिसमुल्लंघनात्तदीयैः करणैर्दूरव्यवहितविप्रकृष्टमपि परिच्छिद्यते परप्रमा
तृगतं च सुखदुःखादि ज्ञायते एवं च तिरश्चामपि नियतिप्रान्तसंकुचितानामपि मनुष्येभ्योप्य
तिप्रायः करणानां विद्यते तद्यथा गावः स्वगृहं व्यवहितमपि पश्यंति अश्वा रात्रावपि मार्गमीक्ष
न्ते गृध्रा योजनशतगतमप्यामिषमवलोकयंति पक्षिणो मक्षिकामषकपर्यंता आकाशविहा
रिणो दृश्यन्ते सरीसृपा उरसा पंथानं यान्ति दंशाश्च एवंति शाहुं उष्णाद्दूरादपि गर्ताछुमसमावेसर्प
माकर्षयेति इत्येवं सर्वत्र करणवैचित्र्यमस्त्येवं तथा भुवनान्यपि आगमप्रसिद्धानि वर्तुलाश्च

चतुरश्रार्धचंद्राद्याकारतयाशान्तिशायस्तेस्यानानि इत्येवं विचित्रो नानातिशयाद्भुतस्वभावः
एषां तनुकरणभुवनानां संतानः अविरतप्रबंधप्रवाहो यस्मिन्निःस्वस्मिंस्तदेवंविधं विश्वं प
देवंविधे चात्र भोग्यस्वभावे विश्वस्मिन्भोक्ता भाव्यमित्याह भोक्ता च नत्र देहीति मालत्रयाच्छ्रातो दे
ह्रो भोगायतनं विद्यते यस्य प्राणिनः स देही सुखदुःखादिस्वभावः शरीरी सुखदुःखादिमयेस्मिन्भो
क्ता सुखदुःखाद्यनुभविता पशुप्रमातेति कथ्यते ननु च परप्रमातृरूपतया एकमात्रस्यापि न भेदो
विद्यते उतनस्तद्व्यतिरिक्तो देही नाम वराकः यदुक्तं प्राटेशोपि ब्रह्मणः सार्वरूप्यानतिक्रमा
श्चाविकल्प्यस्येति एवैकत्र च तत्वे पि षड्त्रिंशात्तत्त्वरूपेणेति न्यायेनैक एव स्वशक्तियुक्तो महा
प्रकाशवपुरेव परमेश्वरः प्रमाता सर्वतोभिन्न एवावभासते ततो भिन्नस्याप्रकाशमानस्य दे
हिनोस्तित्वाभ्युपगमे पि प्रकाशमानत्वानुपपत्तेर्न सत्ता निश्चीयते प्रकाशते चेत्तस्मिन्परब्र
ह्मात्मनि तर्हि प्रकाशाभिन्न एवैकः प्रमातेति पुनरपि किं परत्वेनायं भोग्यभोक्तृलक्षणः संभे
द इति सर्वं समर्थ्यमानमाह शिव एव गृहीतपशुभावः इति योयं भगवान्समनन्तरं प्रतिपा

श्रौं ख्यातिर्यदि नो ख्याति ख्यातिरेवावशिष्यते ख्यातिचेत्ख्यातिरूपत्वात्ख्यातिरेवावशिष्यते
इत्यनेनैवाभिप्रायेण स्पंदशास्त्रे यस्मात्सर्वमयो जीव इत्युपक्रम्यते न शब्दार्थचिंतासु न सावस्था न यः शिव इत्यादिना शिवजीवयोरभेद एवोक्तः
एतत्तत्वपरिज्ञानं जीवन्मुक्तिः एतत्तत्वापरिज्ञानमेव च बंधः इति प्रत्यभिज्ञाहृदये   यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः तथा हृदयबीजस्थं जगदेतच्चराचरं ८

दित श्चिदानंदैकघनः स्वातंत्र्यस्वभावः शिवः स एव स्वरूपगोपनासतत्वः स्वेच्छया नट इ
व देहप्रमातृभूमिकां समापन्नः पाल्यत्वात्पशुत्वात्पशुसत्तालक्षणः सुखदुःखमये स्वयंनि
र्मिते स्मिन्भोग्ये भोक्ता देहीति कथ्यते न पुनः शिवव्यतिरिक्तं किंचित्पदार्थजातमस्ति एष एव च
भगवान्शिवः स्वातंत्र्याज्ज्ञोक्तृभोग्यलक्षणं प्रमातृप्रमेययुगलकं क्रीडनकमिव समुत्थापयति
यद्रूपतयायं भेदप्रधानो व्यवहारः तस्मादेतदेव तत्परमेश्वरस्य स्वातंत्र्यं यदविभिन्नमपि स्वरू
णस्वरूपता परित्यागेन भोक्तृभोग्यस्वभावं पशुभावमापन्नोपि सर्वप्रमातॄणां मनुभवितृतया
स्वात्मनि प्रस्फुरंश्चिदानंदैकघनः शिव एव   एवमप्येकस्यैव तन्नस्वभावः प्रमातास्य यदि माया
दिप्रमातृप्रमेयवैचित्र्येण नानात्वादनेक इति कथं विरुद्धैकतया व्यवह्रियते एकस्यै ।
किमिति नानारूप इति शंकायां तत एव हि विरोधो हि विरुद्धधर्माध्यासः कारणभेदो वेति लौकिक
मत्र दृष्टांतं प्रदर्शयन्त्याचार्यास्तिके चायं समर्थ्यते   नानाविधवर्णानां रूपं धत्ते यथामलः
स्फटिकः सुरमानुषपशुपादपरूपत्वं तथेशोपि   यथैकोपि स्फाटिकमणिस्तत्तद्धा

समभ्युपैति न पुनरेकानेकरूप एक एव पदार्थः स्यात् यदुक्तं
अयमेव भेदो भेदहेतुर्भावानां यद्विरुद्धधर्माध्यासः १

प॰ टी॰
६
6

द्यानीलाद्युपाधिमहत्त्वैवैचित्र्येणतत्तद्वैचित्र्यं स्वात्मनि धारयेत्तस्य विचित्रो भवति न पुनस्त
स्य स्फटिकताद्यानिरेतावता समुत्सृज्यते एतदेव स्फटिकमणेर्मणित्वं यत्तत्तद्विशेषणाङ्कुरिते
पि तस्मिन्स्फटिकमणिरयमित्यबाधिना सर्वस्य सर्वदैव प्रतीतिः केवलमत्रामीलाद्यादयः।
स्फुरन्तीति व्यवह्रियन्ते न पुनर्नीलाद्युपाधिः पटमिव तं विशिनष्टि येन स्वरूपं विप्रलोपात्स्या
त् तस्मादेतदेवामलत्वं मणेर्यदुपाधिरूपानाकारान्बिभर्ति स्वस्वरूपतया च प्रथते तथैवा
यमीश्वरः स्वतन्त्रश्चिदानन्दैवाद्यः स एककोऽपि स्वच्छे स्वात्मदर्पणे देवमनुष्यपशुपक्षिस्थाव
रादीनां रुद्रक्षेत्रज्ञादिपदार्थरूपाणां विशेषाणां स्वयं निर्मितानां च रूपं वर्णवैचित्र्यं स्फ
टिकमणिवत्स्वात्माभेदेन धारयेत्ततोऽपि समुत्तीर्णत्वादहमित्येवमखण्डचमत्कारोपबृं
हितं नानारूपमप्येकं स्वात्मानं प्रत्यवमृशति इत्यमप्यस्यैकता खण्डनामयोऽभिन्नरूपोऽद
शः कालो वा न कश्चिद्विद्यते यदपेक्षयैतस्य स्वात्मनोऽहेश्वरस्य विरुद्धधर्माध्यासादिदूष
णमुच्येतापि साक्षात्कारस्तदा तां चित्रतां नानाभेदसंभिन्नमपि परस्यैवमेव नरदम्भुप

ज्ञानं विना नान्यं विषयतया भजति १

बोधं विशेषयन्नपि न बोधं भिनत्ति किंत्वर्थमेव

ज्ञानं विना

गतं यथा नीलादिचित्रविज्ञाने ज्ञानोपाधिरनन्यभाक् अशाकादर्शनस्तं हि पतत्यर्थे विशेषयन्नि
ति प्रमाणवार्त्तिके किं पुनः सर्वतः पूर्णस्य ज्ञानात्मस्विदेकरसस्य प्रभोः स्वतन्त्रस्य याविमोदेशकालोभे
दकतयाभिमतो मूर्त्तिवैचित्र्यक्रियावैचित्र्याभ्युपायस्य स्वसमुल्लासकृतयास्थितो वाच्यतस्यैव भगव
तो व्यवच्छेदको स्यातां यद्विनाभेदेशकालयोः कदाचित्सं विरोभेदेन स्थितिरभविष्यत्तदा तत्का
लोपि विरुद्धधर्माध्यास उदपत्स्यत इति नत्र संभावना स्यात् यावता तयोः संवित्प्रकाशेनैव स्वात्म
सत्तासिद्धिरिति सिद्ध एवानेकस्वभावोप्येक एव परमेश्वरश्चिन्मूर्त्तिः भेदवादे पुनर्विरुद्धधर्माध्या
सो दुरुद्धर एवेति   नन्वेक एव संवित्तत्त्वः प्रमातान्यभ्युपगतः तनुकरणभुवनानां समापन्नः स्वस्य ए
वानेकतायान इति चेत्तर्हि नन्वादिविनष्टे स एव विनष्टः स्यात् तत्समुत्पत्तौ वा एष एव नष्टोत्पद्येत
एवं प्रतिप्रमातृनिपातः स एव जायतेस्तीति षोढाभावविकारतया विवक्षितेन पुण्यपापस्वभाव
कर्मवैचित्र्येण च तस्यैव भगवतः स्वर्गनरकादिभोगः प्राप्त इति कथमुच्यते स्वस्वतन्त्र एव शिव इति
दृष्टान्तद्वारेण तदपि समर्थयते   गच्छति गच्छति जल इव हिमकरबिंबं स्थिते स्थितिं याति

प. टी. ननु करणभुवनवर्गे तथायमात्मा मेदृशान: यथा जलप्रवाहे यातिप्रति हिमकरबिंबं चंद्र
वपुर्वस्तु वृत्तेनाकाशस्थं स्वयमचलात्मकं जलप्रवाहांत:प्रतिबिंबितमपि न गच्छति प्रयातीव
तथैतस्मिन्नेव क्षणेऽन्यत्र जलाशये निश्चलितमिति प्रतीतदेव हिमकरबिंबं स्थितिं गच्छतीवेत्युभयथा
सर्वप्रमातृभिरेतत्संभाव्यते न पुन: परमार्थेन तत्तथैव स्यात् नापि जलगतोदेशकालोभेद
कतया चंद्रमस: स्वरूपं गगनस्थं परामृशन्त: केवलं जलमेव नाहरणं अथ च तत्प्रतिबिंबित
स्य चंद्रबिंबस्य जलगतचलत्वाचलत्वादिको भेदो व्यवह्रियते इति एतावता गंगाजलगतस्यक
र्दमपूतितस्येवाशशिन: स्वस्वरूपतायां न काचित्क्षिति: तथैवायमात्मा चैतन्यस्वभाव: स्वयं
निर्मितेन नु करणभुवनवर्गे परिक्षीणे सति समुत्पन्नेवा प्रक्षीण: समुत्पन्नश्चेति मायाविमोहि
तानां व्यवहारमात्रमेतज्जलगतचंद्रवत् न पुन: स्वात्मा जायते म्रियते वेति गीतास्वेतदेवोक्तं
न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूय: अजो नित्य: शाश्वतोयं पुराणो न ह
न्यते हन्यमाने शरीरे इति तस्मादयमात्मा मेदृशान: स्वतंत्र: सर्वस्यात्मप्रत्यवमर्षस्वभाव:

ॐ

सर्वे प्रमातृणामनुभवितृतया प्रथमानः सन् न तत्त्वस्याविप्रलोपसमुत्पत्तौ वा स्वस्व-
रूपमेव एतदेव चतुर्दशकारिकोद्देशेनानेन संवित्तत्त्वस्य यत्नघातनया पशुप्रमातृतया स्वर्गनिर-
याद्विभोगभोक्त्रापि सर्वानुभवितृतया संवित्तत्त्वरूप एव प्रमातृत्व एप पापस्वर्गनरकादृत्रिपादि-
कोपयोगपशुभावोबंधकतयाभिमतः यद्यपि भगवता स्वात्मप्रकाशेन प्रकाशितः परामृष्ट-
स्वस्यात्तदा तयोः को स्वात्मनि सत्तालभेत [illegible] त्रिः स्वभाव एवैष इति कथं स्वात्मनस्तस्ये-
वमहेऽस्वस्वरूपविप्रलोपाये जाते सर्वं [illegible] मिव वस्तु संहार्थसमुत्पाद्ये देहादिरूपे
स्यात् न पुनर्भर्त्स्ने भगवति चैतन्यसमुत्पाद्ये विनाशो कदाचिद्भवेत् तस्मादेक एव स्वात्मा
ग्राह्यग्राहकतया नानारूपस्वभावः सन्नपि सर्वानुभवितृतया सर्वस्यैकतया प्रथते
इति न काचिदद्वयवादहानिः इयमपि सर्वेषामयं स्वात्मा विश्वप्रपञ्चस्वभावः एकोऽसौ वि-
स्वात्र परमार्थः सर्वावासः सर्वत्र संविदनुगमादिति युक्त्यागमाभ्यां प्रतिपादितं स्वात्

प्र.टी
८
म॰

किमपि लोष्टादावप्यविशेषात्स्वात्मतया सन् प्रतीयते अभ्युपगमेऽपि वा जउजउ व्यवस्थयं
भासमानानसंगच्छते लोकव्यवहारश्च जउजउत्तरप्रतीतिकायमेतत्स्यादित्याह राहुवद्
रूपेणापि यथा शशिबिंबस्थः प्रकाशते तद्वत् सर्वगतोऽप्ययमात्मा विषयाश्रयणेन धीमु
ऽवे आकाशदेशे सर्वत्र राहुः परिभ्रमन्नोपलभ्यते स एव पुनर्ग्रहोपरागकाले चंद्रमूर्ति
स्थः प्रथमानः अयं राहुरिति प्रतीयते यथा यद्यपि तेऽपि भचक्रे स्थित एव तथैवेहा
पि सर्वात्मतया सर्वत्र स्थितोऽप्ययमात्मा [illegible] वकास्वरूपतया स्फुटरूपः परिस्फुरमाणः
सर्वस्य तथा नोपलक्ष्यते यदा पुनः ग्राहकप्रमातृरूपेण बुद्धिदर्पणे प्रतिभासमुद्रेण ग्राह्यावस्था
काले शब्दादिविषयस्वीकारेण स्फुरणमीश्वरमहं प्रतीतीति विषयो भवति तदा ग्राहकस्वभा
वत्स्या लोष्टादावपि स्थितः स्फुटरूपस्तत्रैव स्वात्मा प्रकाशते सर्वैश्च स्वानुभवैकरूपः
प्रतीयते लोष्टादावतो ततमो न पलायते स्थित स्थितकल्पो सो प्रथते राहुराकाशे यथा

तो

एवमयं भगवान्मायाशक्त्या स्वांगकल्पेष्वपि भाववर्गे कांश्चित्पुर्यष्टकरूपान्वेद्यरूपेणान
प्यहंतावस्यास्ताभिषक्तान्वेदकीकरोति कांश्चिद्वेद्यीकरोति यद्रूपतया येन जडाजडव्यव
स्थास्वभावो भेदव्यवहारः स्थित एवोपपद्यते तेन लोके ... तारतम्येन जडः वेदकता
पुर्यष्टकप्रमाताप्यजडः नपुनः परमार्थेन परमेश्वरीयपरिच्छाजडाजडव्यवहार इति ८
ननु सर्वप्रमातॄणां बुद्धौ चेत्स्वात्मनो ऽप्यशेषणास्फुरणं नहि ... तत् किमिति स्वात्मवि
दो नस्युः अज्ञानवंतो माभूवन्विशेषाभावात् ये तु नः संसारावस्थायामपि ... च नस्वा
त्मज्ञाना जीवन्मुक्ताः सर्वज्ञत्वसर्वकर्तृत्वशालिनः केचन स्वात्मज्ञानयोग्या असत्
वस्थरूपेते अपरे स्वात्मज्ञानरहिताः संतो धर्माधर्मनिमित्तशुभाशुभकर्मनिगडप्र
बद्धाः संसारिण एवेति कथमेतत्संगच्छते इत्यमेतः सर्वज्ञत्वापारमेश्वरः शक्ति
पातो विश्लेषवल इति प्रति.पादयति आदर्शामलरहितेन यद्वद्दने विभाति तद्वद्दये शि
वशक्तिपातविमले धीतत्त्वे भाति भारूपः ९

प्र-ही. दर्पणे मलरहिते यथा निर्विशेषं रूपादिगुणगणयुक्तं मुखं चकास्ति न संशोभित्ये विनि
२ हतमलस्यादर्शेन स्वीकुरुते समले दर्पणे तु मुखमनन्यातिशयमपि स्वमलत्वाद्धि परी
9 त्येन प्रकाशते नापि मलिलनत्वादीयान्गुणान्स्वीकत्वमले प्रस्तुततत्त्वस्त मुखः पुमान्
स्वमनस्येव स्वामलत्वाद्युपेतमवलोक्य स्वात्मनो लज्जामावहति विहृतमहूदनमिति
तथैवास्य शिवस्य स्वात्मनो या भावानुग्रहाख्या शक्तिस्तस्याः पातः स्वकिरणविस्फारस्ते
न संमार्जितप्रतिभामुकुरे आणवमायीयकार्ममलवासना प्रहत्याद्धि प्रदीप्यते केषां
चिदपश्चिमजन्मनां प्रमातृणां भाः प्रशोको ऽनुपेयस्येति स्वभावरूपः स्वात्मायावान्सर्व
ज्ञातृत्वादिगुणगणयुक्तस्तावानस्यावभासते येन केचन नैव ते स्वात्मस्वरूपप्रथनात्संसार
मध्यपतिता अपि मुक्तकल्पाः सातिशयाश्च केषांचिदत्र परमेश्वरतिरोधानशक्त्या
आणवमायीयकार्ममलसमाक्रान्ते बुद्धितत्त्वे भारूपोऽप्यात्मा मालिन्याद्भातोऽप्यभा
तकल्पः येन ते संसारिकाः पशव इत्यभिधीयन्ते अन्येऽप्युभयशक्तियोगात् प्रमाता

स्थाभिरुल चरति अस्मिंतीव्रमंदमंदतरादिभेदेन शक्तिपातवैचित्र्यं सर्वत्राभ्युह्यं अत्र
समाधान: प्रतिनियति शक्तिपातसमुत्थ ... धादि ... पथ्यानादिवानां किंचित्
मेमाचनहेतु: ... मायान: ... प्रधाने वस्तुनसताधना
यकल्पते यदीत्यादिना ... पसान ... इयेति तस्मादेकमेवात्र पर
मेश्वरानुग्रह: कारणमहाद्धि ... इति: शक्तिपातो ...पथ
त्रीसतेचेतन ... नैव किंचित्पश्यते इति ... पर मे
श्वरतिरोधानशक्ति: ... चेते ... भुंजानास्तु शुभकर्मनिरता:
सुखदु:खादिभोगभाज: पुन: पुनर्जन्मो सरंति ... साधारणोपि ...
निमकारणम काशानुग्रह तिरोधानशक्तौ एव एतेषां मोक्षबंधप्रविभाग हेतु ...
बध्नाति काचिदपि शक्तिरनंत शक्ते: ... सम प्रतिहतामवपाशजाले: ...
विनिहत्य गुणान ... एवमिदं सर्वं

प-टी-
१०
10

मागमान्तरभवयुक्तियुक्तं प्रतिपाद्य यत्वाङ्क्तेनो[illegible] ष्यं प्रवि[illegible]विनं नरदेत
त्तावृत्तिसमस्तत्त्तिक्रमेण क्रमिंइ प्राप्तमात्मके [illegible] यग पह[illegible] मांत्ति तत्त्वपथमनः काश्यते
कारणं परमं शिवस्वरूपं कारिकाद्वयेनाह ॥ १० ॥ भानुप्रपरि [illegible] स्वात्मा विश्रा
न्तो महानन्दे [illegible] [illegible] [illegible] तिनमनेन [illegible] पारम्[illegible] सर्वविकल्पावि
हीने शुद्धे शान्ते लये [illegible] विहीन [illegible] तत्त्वन[illegible] विभाति बहि[illegible] न्मजगत् ११
यदयं विधं पर[illegible] शिवतत्त्वं [illegible] शिवादि [illegible] पर्यन्तं वहुसमार[illegible] विश्रा
न्तुकाशते तदभि[illegible] वेच[illegible] समयुक्तोपपद्यते [illegible] तियावत् नन्[illegible] नवते [illegible]
तत्त्वादि [illegible] तन [illegible] तनवा द्वानन् आभूल [illegible] तन [illegible] वस्ति [illegible] चात [illegible]
प्रथितं [illegible] परे [illegible] जाग्रा पाठकः [illegible] चिद्रूपे भगवति परमशिवे [illegible]
उच्यते अपि [illegible] जमापे [illegible] यावता [illegible] न प्रतिपाद्यते तावता न [illegible]

परेशः न वस्तुतः कीदृशं तत्परंरूपं भासप्रकाशानंदस्वभावो यस्य महाप्रकाशवपुरित्यर्थः
तथा परिपूर्णो निराकांक्षो निराकारो मपि स्फटिकमणिदर्पणादिजडं वस्तु भवतीत्याह
स्वात्मनि विश्रांतितो महानंदः स्वस्मिन्स्वभावे स्वउदंताचमत्काररसे विश्रामान्महानानं
दः परानंदः परानिर्वृतिर्यस्येति तदेवं परमाह्लादस्फुरत्तासारत्वात्प्रकाश एव स्फटिकादेर्जडा
द्वैलक्षण्यमुक्तं भवति अत एवाह इच्छामयेति इच्छाज्ञानक्रियाशक्तिस्वभावमेव न
पुनः शांतब्रह्मवादिनामिव शक्तिविरहितं जडकल्पं अन्यच्चानेन शक्तीति अनेनात्रसं
ख्याघटपटादिनामरूपात्मिकाः शक्तयः इच्छाज्ञानक्रियाशक्तीनां पल्लवभूता ब्राह्म्या
द्यः शब्दराशिसमुत्थास्ताभिः परितः समंतात्पूर्णो व्याप्तः तत एवोल्लसत्यपि तत्रैव शाम्य
तीत्येवं परवाग्रूपे भगवति स्वातंत्र्यमुक्तं भवति ननु वाग्रूपे चेत्परं तत्त्वं तर्हि काल्पनिक
शब्देभिन्नत्वात्कथं शुद्धप्रकाशवपुषि कल्पनावियोग इत्याशयेनाह सर्वविकल्पे
ति परमसमानरियोयं परोहंताचमत्कारः स वाग्रूपोपि निर्विकल्पः विकल्पो हि

प॰टी॰ न्मायोद्दलत्वात्सोऽहं यद्वद्घटपटादिप्रमाता तु यत्र घटाद्यवच्छिन्नं पटं निषिध्नोति
प्रकाशस्य पुनः परामृशता चमत्कारसारस्यापि नाप्रकाशरूपः प्रकाशादन्यः प्रति[illegible]
११ न या विद्यते यद्व्यवच्छेदात्तस्य विकल्परूपता स्यात् अवच्छेद्यो ह्यर्थो प्रकाशात्मा प्रकाशवपु
षि प्रकाशते चेत्तर्हि तत्संवेदनरूपेण तादात्म्यप्रतिपत्तिरित्यादिन्यायेन योऽप्यर्थः प्र
काशस्वभावतायातः स कथं स्वात्मनस्तमेव व्यवच्छेदकः स्यात् येन विकल्परूपता तत्र
समावहेत् अथ प्रतिपत्तया न प्रकाशत इति कथं सिद्धोऽप्रकाशमानः पदार्थः प्रतिप
त्तिरूपोऽस्तीति परिच्छेत्तुमपि शक्यते इति यत्किंचिदेतत्स्यात् यतः सर्वैर्व्यवच्छेदात्मकैर्वि
कल्पैर्विहीनमपरिच्छिन्नस्वभावं परं तत्त्वं अत एवाह शुद्धमिति विमलं विकल्पमय्या
अशुद्धिमय्या अभावात् तथा शान्तमिति ग्राह्यग्राहकसमुत्थक्षोभाभावाच्छकलितसामर
स्येन स्वस्वरूपस्य न पुनः प्रशान्तकलकल्पं अच्युतत्वयोगद्वयेति सकलं हि भातोऽयमात्मेति
कृत्वा सनातनमेवातो भूतभविष्यद्वर्तमानवपुः कालस्तेन न क्रमते यतः कालस्य तत ११
एव

समुल्लासयति समुत्पन्नि विमर्शावहित्येऽपि ते परमेश्वरे पगते विश्वस्याविश्वत्वमपि पवन्नमि
ति प्रतिपादितं स्यात् ॥ ननु एवं विधे परतत्त्वे जगद्भातीति यत्प्रतिपादितं तत्कथं स्यात् याव
ता परतत्त्वापेक्षया न किंचिद्भेदेन भातुं प्रगल्भते ततोऽभिन्नं चेज्जगद्भासते तदाद्वयवादत्वे
ऽपि ना अभिन्नं चेज्जगत्प्रकाशते इति कथं वा चोद्युक्तिरिति दृष्टान्तद्वारेण भेदाभेदरूपं तत्त्वमु
पदर्शयन्नेतत्समर्थनायाह दर्पणबिंबे यद्वन्नगरग्रामादि चित्रमविभागि भाति विभाग
नैव च परस्परं दर्पणादपि च ॥ विमलतमपरमभैरवबोधात्तद्विभागशून्यमपि अन्यो
न्यमपि ततोऽपि च विभक्तमाभाति जगदेतत् ॥ यथा निर्मले मकुरान्तराले नगरग्रामपु
प्राकारादि हर्म्यस्थलनदनदीजलनदह्रदपर्वतपशुपक्षिस्त्रीपुरुषादिकं सर्वं प्रतिबिंबतया दे
वैस्वालक्षण्येन नानारूपं भासते अविभागि दर्पणादविभक्तं सद्भाति देशभेदेनैव नराकारं
समर्पयति तत्राभेदेन भासमानमपि भाति विभागेनैव च परस्परमिति अन्योन्यस्मात्
न च घटात्पटो भिन्नः पटाद्घटो भिन्न इति विभक्ततया स्फुरति तदंतर्गतादि भावात्

तेन परामृश्यते न पुनस्तेन दर्पणेन तत्काष्ठस्य किंचिदुपलभ्यते किंतु दर्पणसामरस्येन स्थि-
तमपि सर्वं स्वतो भिन्नं जगत्प्रतीयते एवमपि घटादिप्रतिबिंबेन दर्पणस्तद्वत्तदितः स्यात्
इत्येतन्नेत्याह दर्पणादपि चेति न केवलं भावाः स्वयं दर्पणान्तर्गता अपि भिन्नाः प्रकाश्यन्ते
यावद्दर्पणादपि व्यतिरिच्यन्ते यतो दर्पणस्तत्प्रतिबिंबमध्यादपि तेभ्यः प्रतिबिंबेभ्यः समु-
त्तीर्णस्वरूपतया चकास्ति न पुनस्तन्मयः संपद्यते येन च न दर्पण इति प्रतीतिः स्यात् सर्व-
स्य पुनस्तत्तत्प्रतिबिंबग्रहणेऽपि दर्पणोऽयमित्यबाधिता प्रतीतिः नापि घटादिदर्पण-
विश्रान्तिर्हि येनायं घटदर्पणोऽयं पटदर्पण इति स्वस्वरूपताहानिरस्य जायेत देशकृतः
कालकृतो वा भेदो न तत्स्वभावविप्रलोपाय भवति तस्मात्तत्प्रतिबिंबसहिष्णुः स्वस्वा-
त्मनि दर्पणो दर्पण एवेति न काचित्प्रतिबिंबवादक्षतिः अथोच्यते भ्रान्तिरेषा यद्दर्प-
णो दृश्यत इति परामृश्यते न तु पुनर्दर्पणे सकाश्चिद्दृष्टिर्विद्यते तथात्वमात्मक्रियाविरहात्
भ्रान्तैवैषा निश्चयः इति एवं तु प्रतिबिंबवादे दृष्टान्तस्तावत्सिद्धः भ्रान्ते स्वरूपान्तरे समनन्तरे
निरूप्यते १२

परमभैरव
यथा प्रतिबिंबेभ्यः दर्पणः एवमपि विश्वभावप्रतिबिंबेभ्यो हि स्वः प्रकाशो विश्वभावेभ्यः समुत्तीर्णः ४=

तद्वत् तथैव दर्पणे नगरादिप्रतिबिंबं दृष्टं तेन विमलतमं बोधादतिशयेन विगलितकालि
कान्तरेणानेन टीकितम् प्रकाशात् जगद्विश्वविभागमन्यमपि दर्पणप्रतिबिंबवत्ततः प्रकाशाद
विभक्तमपि परस्परं च विभक्तं वनग्रामनगरादिकापेक्षया नानारूपं प्रथ्यते ततोऽपि चेति बोधा प्रथ्यते ४=
दपृथग्भूतमिवाभाति यतो बोधस्तद्रूपतयापि प्रथमानस्ततः समुत्तीर्णः सर्वस्यानुभवितृ
तया स्वस्वरूपेण प्रथ्यते भावगतोऽपि देशकालाकारभेदः केवलमत्र प्रकाशेन दर्पणवत्तत्र पुनः
स्वरूपे न संभिन्नत्ति अतः एवैकानेकस्वरूपोऽपि बोध एक एव बोधाभ्युपगतचित्रज्ञानवत् किं
तु दर्पणप्रकाशात्स्वचमत्कारस्य चित्प्रकाशस्य यान्विशेषः यद्दर्पणे स्वच्छतामात्रस्तेनाप्येत
भिन्नं बाह्यमेव नगरग्रामादि प्रतिबिंबत्वेनाभिमतं भाति न तु स्वे निर्मितं अतो दर्पणोऽयं ह
स्तीति यो निश्चयः स भ्रान्तः स्यात् प्रकाशः पुनः स्वचमत्कारसारः स्वेच्छया स्वात्मभित्तौ व
भेदेन परामृशन् स्वसंविद्रूपाधानमेव विश्वमाभासयति विश्वस्याभासनमेव निर्मातृत्वं
भगवत इति परामर्श एव प्रकाशस्य जडाद्दर्पणप्रकाशाद्वैलक्षण्यापादकं स्वरूप

प-टी- मित्येतदेव ग्रंथकृता विहृति विमर्शिन्यामुक्तं अंतर्विभाति सकलं जगदात्मनीह यद्वद्वि
चित्ररचना मुकुरांतराले बोधः पुनर्निजविमर्शनसारयुक्त्या विश्वं प्रकाशयति नो मुकुरस्तथा
१३ त इति यस्य परमेश्वरापेक्षया सांग निमित्ते भावराशौ न काचिद्भेदभ्रांतिः मायीयमात्रपेक्षयात प्र
भेदं योयं बोधावभासः एषा एतस्याख्यातिरूपा भ्रांतिः स्फुरणस्य हृदयात्मनो रूपस्याख्यानेन मन्यथा एषा
13 न भासते किंतु एषा हृदयरूपं भासते भेद एव प्रतीयते इति यावत् तस्माच्छिवद्योये प्रति विवादः १२
तत्त्व इत्थं परब्रह्मस्वरूपनिरूपणं पूर्वं प्रकाशाभेदेन जगतः षट्त्रिंशत्तत्त्वात्मकस्य स्थितिं निधाय
पुनरप्येतस्य समुत्पत्तिक्रमेण प्रतितत्त्वस्वरूपं कारिकाभिः प्रतिपादयति शिवशक्तिसदा
शिवतामीश्वरविद्यामयीं च तत्त्वदशां शक्तीनां पंचानां विभक्तभावेन भासयति १४ योयं
परमशिवः परतत्त्वनिरूपणया सम्यगनंतरं प्रतिपादितस्वभावः स्वस्वरूपरूपाः स्वाः सरूपः
चिन्निर्वृतिरिच्छाज्ञानक्रियाख्याः पंच अनेन शक्तिव्रातदेवतानां तासामेव पंचानां शक्तीनां
भिन्नत्वेन अंतर्ध्यावृत्त्या स्मोतत्त्वदशां पंचसंख्याकच्छिन्नामेव भासयति स्वात्मरूपेण प्रक १२
टयतीत्यर्थः

तद्भिन्नभेदेन

कीदृशीं तामित्याह शिवेत्यादि शिवस्य शक्तिश्च सदाशिवस्य तेषां भावो यस्याः सा तथोक्ता तां
तथा ईश्वरविद्ये प्रकृते यस्याः सा तथेति अत्र प्रतितत्त्वं स्वरूपं प्रदर्श्यते तथा हि सर्वप्रमातृणामं
तःस्फुरणाहन्ताचमत्कारमये सर्वतत्त्वोत्तीर्णे महाप्रकाशवपुषि स्थैतन्यमेतदेव शिवतत्त्वं १ अत्र
तत्त्वनिरूपणामुपदिश्य जनोपनयेति तस्यैव भगवतश्चिद्रूपस्यानन्दरूपा विश्वं वमामीति प
रामर्शात्मा विश्वाभावस्वभावमयी संविदेव किंचिदुच्छूनतात्मरूपा सर्वभावानां बीजभूमिरियं श
क्त्यवस्था एषैव विश्वगतसृष्टिसंहारोपचारात्मशार ौभयरूपापेक्षैव सर्वरहस्यनयेषु गीय
प्र° ते २ पुनरन्तरेव विश्वसमुत्पत्तिबीजभूमौ महाशून्यातिशून्यायामहं शब्दाहमिदमित्यभेदेन स्फु
रणोन्मुखतामयो यश्चमत्कारोन्मेषान प्राधान्यात् क्रियाभागस्याहन्ताविश्रान्तेः सेयं सदाशिवदशा ३
अत्रैव च महेश्वराः प्रमातारस्तिष्ठन्ति तथात्रैव अहमिदमिदमित्यभेदेनाहन्तेदन्तयोः समधृततुला
पुटन्यायेन यः स्वात्मचमत्कारः सेषा तस्यैश्वरावस्था ४ अत्रापि मन्त्रेश्वराः प्रमातारः अत्रापीदं
ताप्राधान्येनाहन्तागुणीकारेण या इदमहमिदमिदमित्येवंरूपश्चमत्कारः सद्योजातबालस्येव

प॰टी शिरोंगुलीनिर्देश्यः एतदेव बोधसारत्वाद्भगवतः शुद्धविद्यातत्त्वं ३ अत्र विद्येश्वरैः सदृशमको
१४ टसकुमन्त्राणां वाचकतयानुग्रहस्वभावात्मसंकुद्धैर्वाच्यान्मेत्रमहेश्वरमंत्रेश्वरान्प्रत्यवतिष्ठ
14 ति अत्र विद्यातत्त्वे विद्येश्वरप्रमातॄणां बोधरूपत्वाविशेषेऽपि यो भेदस्स मायामायाशक्तिरैतैव
त्यागमेषु गीयते मायोपरि महामायेति नयेन तत्रस्या मेवामहामायानुप्रवेशादणवश्शुद्धच्य
ते मायातत्त्वोपरि शुद्धविद्याधश्च विज्ञानाकलाः प्रमातारश्चाणवमलभाजनं एवमेकमेवेदं
शिवस्वरूपं तुर्यातीतमपि तुर्यारूपतया तत्त्वपंचकतया गीयते तस्मादेक एवैष स्वतन्त्रः कर्ता प्रका
शते यस्याहमिदमिति सदाशिवस्वरूपमाद्यः प्रकाशः एतदेव शुद्धवेदनरूपं करणं वक्ष्यमाण
मायातत्त्वादि धरान्तं तत्त्वसर्गस्य कार्यमित्येवं कर्तृकरणक्रियारूप एक एव स्वात्म महेश्वराख्यः
परमप्रमाता विजृम्भते १४ मायातत्त्वस्वरूपमाह परमं यत्स्वातन्त्र्यं दुर्घटसंपादनं महेशस्य
देवी मायाशक्तिः स्वात्मावरणं शिवस्यैतत् १५ परममनन्यापेक्षं यत्परमेशितुः स्वातन्त्र्यं विश्व
निर्मातृत्वं सैवेयं मायाख्या शक्तिः तस्य शक्तिमतो मीयते परिच्छिद्यते धरान्तं प्रमातृप्रमेयप्रपं १४

चैयपाश्चार्थया विश्वमोहकतयावामाया एषाद्देवस्य क्रीडाशीलस्य संबंधिनी तिष्ठता तादेवीनगु
नैर्भत्यवादिनामिव व्यतिरिक्ता काचिन्मायोपपद्यत इति कीदृशेन तत्त्वातेऽे दुर्घटस्य पादनमिति इः
रेवन घटयितुं शक्यमिति दुर्घटकार्यस्य प्रमातृत्वमेयरूपस्य संपादने प्राप्तिप्रापकं एषा एव
मायात्वेन पाशपशुभावमापन्नस्य शिवस्य स्वात्मावरणस्वरूपे गोपनाख्यमाणवादिमलत्वित
यं १५ वक्ष्यमाणेन च प्राधानिके स्वावादिरूपे भिन्नभोग्यपर्यन्तात्तत्त्वं पुंस्तत्त्वं तत्स्वरूपमाह मा
यापरिग्रहवशाद्बोधो मलिनः पुमान्पशुर्भवति कालकलानियतिवशाद्रागविद्यावशेन
संबद्धः १६ मायास्वीकारपारतंत्र्यात्सर्वकर्तृत्वमसर्वकर्तृत्वमयोपि बोधः सर्वज्ञतादिगुणापह
स्तेनेनस्वख्यातिरूपमाणवमलमापन्नः येन घटाकाशवत्स्वरूपस्वरूपः चिदाकाशाद्विच्छेद्य
परिमितीकृतः सन् तदेव पुंस्तत्त्वमुच्यते अतो मायया पाल्यः पाशपश्चेति पशुः आणव
मायीयकार्ममलस्वभावानां पाशानां भाजनं अन्यच्च कालकलेति वक्ष्यमाणस्वरूपैः कालादि न४
भिरेतत्प्रोतं तया सम्यग्बद्धो रूढ इत्येवं तत्त्वषट्कवेष्टितं पुंस्तत्त्वं १७ कालादीनां तत्त्वानां च हेतुत्वेन
क्रमेण स्वरूपमाह अधुनैव किंचिदेवेदमेव सर्वात्मनैव जानामि मायासहितेकल्पु कंचुक

प॰टी॰ मतोऽन्तरंगमिदमुक्तं १७ इत्थं स्वतंत्रोपि बोधः स्वमायया यया अणुत्वं प्राप्तस्तथैव तदीये ज्ञान
१५ क्रियाशक्ती संकुचिते अस्य पशुरूपस्य विद्याकले उच्येते यथा राज्ञा पहृतसर्वस्वस्यानुकंप त्र
याजीवनार्थं किंचिदुपनेतो ग्रामो दीयते तथैवाणुत्वमापन्नस्य बोधस्यापहृतसर्वज्ञत्वादेः किंचि
15 ज्ज्ञत्वकर्तृता परमार्थं ज्ञातृत्वमुपोद्बल्यते इति ज्ञत्वस्यैव प्राधान्यात्कलादीनां ज्ञानातिनान्वयो दर्शि
तः इदं कंचुकषट्कमुक्तानुरूपया मायया युक्तोऽणो रागोऽवमलापहस्तितसर्वज्ञत्वादेः अणोः स्वरू
= पाच्छादकं स्वर्णस्य कालिकेवान्तरंगं निजं कथितं किंरूपमित्याह अधुनेत्यादि अधुनैव जा
ज्ञानेच्छावच्छिन्नितद्विषयंच= नामीति सोऽणुर्वर्तमानया इदमद्य यातातेज्ञानामि ज्ञास्यामीत्येवमपि कृते करोमि करिष्य
वेति ज्ञानस्वरूपेण भावान् घितया कलयन् अवच्छिनत्ति चेत्येषोऽस्य कालः १ तथा किंचिदेव
तिअवच्छिन्नमेव करोति न सर्वं कालमलं घटमात्रकरणाय प्रभवति न पटादावित्येतदस्याप्य
णोः कलातत्त्वं १ इदमेवेति नियमात्कारणान्नियते कार्ये यद्दर्श्यते यथा वह्नेरेव धूमः अ
श्वमेधादिकर्मण एव स्वर्गादिफलं न सर्वस्मादित्येवं नियमेन स्वसंकल्पकृते कर्मप्रबंधसन्त
त्यापुण्यपापरूपैः बंधनियम्यते येन तदस्य नियतितत्त्वं १ तथा सर्वात्मनैवेति येयमपूर्णंमन्यता सर्व १५

ममेदं कृपयुज्यते भयोः स्मेमाँ भव वमित्येतत्स्पष्टोऽरागतत्त्वं ४ वृद्धिं धर्मो योऽरागः सपूर्णाद्यां कृपायितिर्कोना
लत्वेऽगोर्थन्यदं पो ह्याश्रमे रागग्रान्यभि षंगमात्रे न सर्वाकालामयस्यागतत्त्वस्य समानेः तयाजा
नामीति किंचिदेव पुरोवर्तितृटादिके न पुनर्रह रव्यवह्निते वर्त्तितिमिष्यामत्वे ९ मृडुविद्यापेत्स्या
कारिकायामविद्येतिकाचित्ते मतु नैवेदनाभावात् मायामहितेमेदमध्यापुत्तमेनन्कंचुकेष्वकु प
शोरिति १७ कथमेतस्य कंचुकाषङ्कस्याणेः प्रतिमेमरंगत्वमित्याह कंचुकमिवतंडुलकणोऽभि
निविष्टंभिन्नमप्यभिदा भजतेतत्त्वविग्राड्डिं शिवमार्गोऽन्यत्वयेऽपि वा १८ वास्तवेनरूपेणभिन्न
मपि कंचुकेयथाग्रभिदा तंडुलकणेऽभिनिविष्टमिति अभेदेन तंडुलात्मभासते भिपुणैगर्पि यत्न
तः प्रविक्षिप्यमाणे तंडुलस्यांतरंगत्वात्र एवगवमिहते नथैवन्मायादिकंचुकमणोस्तंडुलस्यानी
यस्यांतरंगत्वात्कंचुकस्यानीयं व्यतिरिक्तमप्यवेभिविक्तत्या स्वर्णेऽवित्तस्वरूपमाच्छाद्यस्थित
मितिशेषः एवमपि दुर्निवारे कंचुके हि लीयत इत्याह भजतइत्यादि तद्विशेषे नान्योत्रोपायः
शिवस्यस्वात्ममहेश्वरस्यायोऽसौ मार्गः परमाद्वयचिदानंदैकघनोऽस्मि ममैवेदं विश्वं स्वशक्ति

१९ विजृंभणामात्रमिति यावत्स्वात्मस्वरूपविमर्शनिमज्जनमेवमैश्वर्यरूपासरणिलक्षणोन्मेषोदाहृतोनन्तविभा
प॰ टी॰ लनपरत्वे स एव योगः एवंरूपतया प्रमाणो स्वात्मनि स्वस्वरूपेतयाभेदः तेन तदुक्तं स्वरूपकेतु
16 के विशेषेण शुद्धिं भजते स्वयमेव निःशेषेण विलयमेवते एतदुक्तं स्यात् यदा परमेश्वरशक्ति
पातविशुद्धहृदयः पशुर्भवति तदा तस्य हृदमेव परमेश्वर इति स्वात्मज्ञानाविर्भावात्स्वयमेव प
शुत्वापादकं कंचुकावरणं विलीयते न पुनरत्र स्वात्मज्ञानं विहाय मायीयं किंचिन्नियतिशक्ति
समुत्थं कर्म प्रगल्भत इति १८ एवंविधस्य गुणो भोक्तृत्वभोग्येन भावमिति प्राधानिकं तत्त्वमा
ह सुखदुःखमोहमात्रं निश्चयसंकल्पनाभिमानस्य प्रकृतिरथांतःकरणं बुद्धिमनोहंकृ
ति क्रमशः १९ सत्वरजस्तमसां यत्सुखदुःखमोहात्मकं सामान्यरूपमंगांगिभावो यत्रनोप
लभ्यते सा मूलकारणं प्रकृतिः महत्तरं तत्कार्यरूपमंतःकरणमाह निश्चयेत्यादि नि
श्चयः इदमेतादृगिति संकल्पनं मननं अभिमानो ममतेति क्रमेण बुद्धिर्मनः अहंकार
इत्येवंरूपं त्रितयमंतःकरणं अंगांगिभावेन गुणानां कार्यमतेनहि याह्यपदं यांतःकरणमि १९
ति

वान्तःकरणमाह श्रोत्रंत्वग्नेत्ररसनाघ्राणं बुद्धीन्द्रियाणि शब्दादौ वाक्पाणिपादपायूपस्थं कर्मे
न्द्रियाणि पुनः २० वक्ष्यमाणे शब्दादौ विषये ज्ञानप्रधानानि श्रोत्रादीनि पंचेन्द्रियाणि क्रियाप्रधा
नानि चेन्द्रियाणि पंचवागादीनि वचनादानविहरणविसर्गानंदात्मकानि कर्मेन्द्रियाणि विषया
णि तु भयथा श्रृणोमि कथयामीत्यहंकारानुगमादहंकारकार्याणि २० एवं शब्दादिविषयहेतु
पंचकमाह तेषां ग्राह्यो विषयः सूक्ष्मः प्रविभागवर्जितो यः स्यात् तन्मात्रपंचकं तच्छब्दः स्पर्शो
रूपं रसो गंधः ४ तेषां कार्यं तयोर्नां कार्यः एषामिन्द्रियाणां विषयो गोचरः स्यात् सर्वोऽ^ सामान्य^
^शब्दसामान्यं शः प्रविभागवर्जितः विशेषभावद्विष्कृतः सामान्यात्मा सूक्ष्मो योऽर्थो भवेत् तदेव शब्दादि
पंचतन्मात्रं^ शब्दतन्मात्रमित्येवमस्याभि विषयविषयिणोः परस्परापेक्षत्वादिंद्रियवदिदमपि त
न्मात्रपंचकमाहंकारिकमेवेति ३१ विषयाणां परस्परसांकर्येण पृथिव्यादिकार्यमित्याह
एतत्संसर्गवशात्स्थूलो विषयस्तु भूतपंचकं तो ग्राम्येति नभः पवनस्तेजः सलिलं च पृथ्वी च ३२
एतेषां संसर्गवशात्परस्परसंबंधसामर्थ्याद्यो विशेषः स्थूलो विषयः स एव भूतपंचकतां याति

प॰टी॰ तथाहि शब्दतन्मात्राच्छब्दविषयो नभो जायते शब्दस्पर्शाभ्यां पवनः रूपसंयुक्ताभ्यामेताभ्यां पंच॰२
तेजश्च एभ्यो रससंयुक्तेभ्यश्चापः गंधसंयुक्तेभ्यश्च पृथ्वी इति च पंचमहाभूतानि कार्यकार
१७ णानुगुण्यमिति ज्ञात्वा एकोत्तरगुणानीत्येवमेषा प्रकृतिः कार्यकारणात्मा प्रकृतस्य परमेश्वर
17 स्वेच्छया भोगप्रतया प्रवर्तत इति बहिर्गुणतत्त्वात्मकं जगद्विभज्य प्रतितत्त्वं निरूपितं २२ मायाकंचु
कवत्प्रकृतः कंचुकतां प्ररूपयमित्याह तुष इव तंडुलकणिकामावृणोते प्रकृतिरेवं काः सर्गः
पृथ्वीपर्यंतोयं चैतन्यं देहभावेन २२ अयमपि प्राधानिको सर्गो धरापर्यंतः तंडुलकणो यथा
तुषाधान्यचर्मणावृणोते समाच्छादयति तथैव मायाकंचुकेन कंचुकस्थानीयेन समावृतं चै
तन्यं पुनरपि तुषस्थानीयेन देहभावेन तत्समावृणोते तत्प्रतिभाकारतयास्फुरयति अवेमप्र
मातारः कलाभिरिन्द्रियमात्राभिर्विशेषाताभिर्देहस्वभावाः सकलास्तेच्यंते विशेषवर्जि
ता विदेहाः प्रलयाकला इति चैवं शिवाद्यसकलान्तप्रमातृसप्तकस्य नाथं रुद्रदेहे नचत्ताधिष्ठि १७

परप्रमाता १ मंत्रमहेश्वरः २ मंत्रेश्वरः ३ विद्येश्वरः ४ विज्ञानाकलः ५ प्रलयाकलः ६ सकलः ७

तेमगदिति २३ कंचुकत्रितयस्य परसूक्ष्मस्थूलरूपतामाह परमावरणं मलमिह सूक्ष्मं मायादिकं
चुकं स्थूलं बाह्यं विग्रहरूपं कोशत्रितयैर्वेष्टितो ह्यात्मा २४ चैतन्यस्य स्वरूपापहस्तनसतत्त्वात्ख्याति
रेव आणवो मलः आन्तरः सूक्ष्मस्य कालिकेन परममेतरङ्गमावरणं छादनं तदात्म्येन स्थितत्वात् मा
यादिविद्यान्तं कंचुकषट्कं सूक्ष्ममावरणं स्थूलस्य कंचुकमिवाणोरावरणं दृष्टपातित्वेनास्ते येन भेद
मयी ज्ञातृकर्तृत्वादिप्रथा प्रथते इत्येष मायीयो मलः एतद्रूपत्वया बाह्यं त्वगस्थानीयं साधानिकं शरी
२ रसत्यान्तलक्षणमावरणं स्थूलं तत्र ग्रामादिरूपत्वात् एवं तृतीयः कार्मो मलः येन समाताशुभाशुभक
र्मसंचयभाजनं भवति एवमनेन परसूक्ष्मस्थूलरूपेण कोशत्रयेण वेष्टितो विकल्पोऽपि घटाकाश
वत्संकुचितीकृतत्स्मात्मेति अणुरिति पशुरित्युच्यते २४ अज्ञानतिमिरयोगादेकमपि स्वं स्वभावमात्मा
नं ग्राह्यग्राहकनानावैचित्र्येणावबुध्येत २५ एष कोशत्रयसंबद्ध आत्मा आत्माख्यात्यंधकारसंबं
धादेकमपि अद्वयस्वभावमपि स्वं निजं नान्यस्मादुपनतमात्मस्वभावं चैतन्यमात्मसत्तालक्षणं स्वरू
पं प्रमातृप्रमाणप्रमेयनानारचनया नानाप्रपंचेन जानाति अभेदविपरीतेन भेदेनाभिमन्यते इतिया
वत् यथा रेखा तिमिरोपहतः पुरुषः एकमपि चंद्रं पश्यति द्वौ चंद्राविमौ नभसि स्त इति परिच्छिंदन्तो

प॰टी॰ कमपि दर्शयते द्वौ चंद्राविमौ पश्येति वस्तुवृत्ते नैक एवासौ चंद्र इति तिमिरवशात्तथाभासते येनो
१८ द्वेगलद्दलन्नमानं दलत्तं वार्थक्रियां स तिमिरिकः प्राप्नोति तथैवात्मानतिमिरमायाभेदप्रथः सर्वस्मा
त्मनो भिन्नमपि स्वं बहुरूपं भिन्नं कर्मफलमर्पयते येनासौ योऽभय स्वर्गनरकादिभोगभाग्भवति अत
श्चात्मानम्यतिमिरेणान्यरूपेण विपरीताभासनात् ४५ आत्माद्वयत्वं दृष्टान्तेन निदर्शयति रसफाणि
तशर्करिकागुडखंडाद्याद्येषु रस एव तद्वद्वस्याभेदाः सर्वे परमात्मनः शंभोः ४६ रसादयश्चेक्षु
भेदाः यथा एकस्यैवेक्षुरसस्य परमार्थतः सर्वत्र माधुर्यानुगमात् तथैव जाग्रदाद्यवस्थाभेदा ग्राह्यग्राह
करूपे च रूपाः सर्वे विशेषाः परमात्मनः स्वस्वभावस्य शंभोः चैतन्यमदेश्वरस्यैव यतः स एव भगवा
न्सर्वस्य स्वात्मभूतः स्वस्वतंत्र्याज्जातामपि भेदमिकास्वमापन्नस्तथा तथा ग्राह्यग्राहकाद्यवस्याविशिष्टाः
प्रथा प्रथते यथेत्थंभूतः स्वतंत्रपुनः स्वात्मनस्तस्माद्भिन्नं किंचिदस्तीति स एक एव सर्वास्ववस्थास्वसंवि
दनुगमात् इत्थं सर्वत्रैकरूपतादर्शनात् आत्मा सर्वरूपो भवति यथाह श्रीशम्भुभट्टारकः
एको भावः सर्वभावस्वभावः सर्वे भावा एकभावस्वभावाः एको भावस्तत्त्वतो येन दृष्टः सर्वे भावा
स्तत्त्वतस्तेन दृष्टा इति भगवद्गीतास्वपि सर्वभूतेषु येनैकं भावमव्ययमीक्षते अविभक्तं विभक्ते १८

अनन्तानं विद्धि सात्त्विकमिति २६ तीर्थान्तरपरिकल्पितमनुभेदः । केचित्पर्यमभ्युपगतोपि न सत्यभूमा
वबकस्यैतदित्याह विज्ञानान्तर्यामिप्राणविराड्जातिपिण्डान्ताः व्यवहारमात्रमेतत्परमार्थेन तु
न सत्येव २७ विज्ञानमिति बोधमात्रमेव केवलमनुपादिनामरूपरहितमप्यनादिवासनाप्रबोध
वैचित्र्यसामर्थ्यान्नीलसुखादिरूपं बाह्यरूपतया नानात्मकं भातीति विज्ञानवादिनः । एकमेवेदं स
र्वं नेह नानास्ति किंचनेति न्यायेनान्तर्यामि सर्वस्यैव परमं ब्रह्मैव अनाद्यविद्यावशाद्भेदेन प्रकाशत
इति ब्रह्मवादिनः । अन्तर्यामी यत्रापि वेदनस्य स्थानमजीवनभूतं विश्वनिर्माणहेतुरिति नु चेति
ते अन्ये प्राणब्रह्मवादिनस्तु यथा प्राणनमेव विश्वमाश्रित्य वर्तते न हि प्राणनादृते न्यत्किंचिद् इति
त्पत्तौ रूपमिति सविमर्शीं प्राहु ब्रह्मेत्याहुः । अपरे मतिपत्त्राययया विराड्देहमिति वैराजं ब्रह्मणः
सत्यभूतमिति यथोक्तं यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः । सूर्यश्चक्षुर्दिशः श्रो
त्रे तस्मै लोकात्मने नमः इत्येवमादि । जातिरिति महासत्तासामान्यलक्षणं सर्वगुणाश्रयं वस्तु
परमार्थं सदिति वैशेषिकादयो ब्रुवते अन्ये पिण्ड इति व्यक्तय एव परमार्थसत्याः न हि सामान्य

प॰टी॰ १९

19

नामकिंचिदेकमनेकगुणात्मकं प्रकाशते नाप्युपपद्यते उपयुज्यते वा इति व्यक्तीनामेव व्यवहारः
परिसमाप्तः किं सामान्येनेति नानावृत्तिविकल्पैः सामान्यं विघटमाना व्यक्तयो नानुयेति अन्यदनुया
यिन भासते इति एवमादिबहुब्रुवतो जातिर्न परार्थ इति प्रतिपन्ना इत्येवं वितानादिपिंडोंते येषां भे
दानां तेन तथोक्ता व्यवहारमात्रमेतदिति अस्मिंस्तावत्प्रवादे प्रकाशमानस्य वस्तुनो न पट्वीयस्त्वादे
भेदाः सन्तीति सत्यत्वेन प्रकाशेते परमार्थेन तु न सन्त्येवेति न पुनः सत्तत्त्वतो येन भेदास्तीर्थान्तरप
रिकल्पितभेदा विद्यमाना एव तस्मादेक एव परमप्रकाशपरमार्थः स्वतंत्रैश्वर्यतन्मयमहेश्वरः इत्य
भिन्यचकास्ति यतोऽन्यस्य तद्व्यतिरिक्तस्याप्रकाशरूपस्य प्रकाशमानताभावात् यदुक्तं तीर्थधि
याव्यसनिनः समनीषिकाभिः कृतैर्यदस्त तत्त्वमिति यदुदमीघटेति तत्तत्त्वमेव भवतोऽस्ति न किंचिद
न्यत्स्ताः केवलमये विदुषां विवादः २७ इदानीं भ्रांतेर्महत्त्वप्रतिपादनसामर्थ्ये निदर्शनमा
ह रज्ज्वां नास्ति भुजंगस्त्रासं कुरुते च मृत्युपर्यंतं भ्रांतेर्महती शक्तिर्न विवेक्तुं शक्यते नाम २८ १९
भ्रांतेः एषा व्याख्यातिरूपाया अतद्रूपप्रतिभासनेन महती शक्तिरुत्तमं सामर्थ्यं न केन विवेक्तुं

शक्यते नकेनचिद्विचारयितुं पार्यत इतियावत् यथावस्तुवृत्तेनरज्जुपरिदृश्यमाना दीर्घत्वकुण्डलिनी
त्वपत्वभ्रमात् सर्पोयमित्यध्यवसानगुणेनरज्जुद्रव्येणसदृशप्रतिभासोयं सर्पावमायः सदृशप्रतिभा
साद्द्वयं मरणावमायं विदधाति अनुभवसिद्धमप्येतत् स्यात्पूर्वभूतमिति मत्वा यद्यपि भीषणीयं वाक
रंसमुल्लिख्याभ्राताः संतोहद्धंतानाशंकेनामनयाताः इतिविभ्रमएव अप्रतीतप्रथनेहेतुरिति २९
एतत्प्रकृतेसमर्थयते नहद्धर्माधर्मस्वर्निरयोत्पत्तिमरणसुखदुःखं वर्णाश्रमादिचात्मन्यसदपि
विभ्रमवलाद्भलाद्भवति एवंयथारज्जुः परमार्थसतीभ्रांत्यासर्पतयाविसृष्टापिसर्पगतामर्थक्रियां
करोति तथैवदेहात्माभिमानिनोचेतसि धर्मादि असदपितत्त्वतोविद्यमानं विभ्रमवशान्मायाप्रमो
दृसामर्थ्यादेवभवति एतदेवतत्त्वमिति भ्रांत्यासत्तालभते धर्मः अश्वमेधादि अधर्मोब्रह्महनना
दि स्वर्निरतिशयाप्रीतिः निरयोयातना उत्पत्तिःजन्म मरणंजन्माभावः सुखमाह्लादः दुःखंर
जस्तः क्षोभः तथावर्णोब्राह्मणोस्मीत्यादिः आश्रमोब्रह्मचारीत्यादिः आदिग्रहणात्तपोजपव्रतानि
इतिसर्वंकल्पनामात्रसारं विभ्रमविजृंभितमेवमायाशक्त्यादेहाद्यात्मतयाभिमन्यते एतत्सर्वंभ्रांतेः
प्रभवतियथाश्चनवरतंस्वर्गनरकजन्ममरणप्रबंधभाजः पशवः नपुनःपरमार्थतःस्वात्मनोन

प्र॰टी॰ वह्निन्नविदात्मैकघनस्य धर्माधर्मादिकं किंचिद्विद्यत इति २५ एवमसमर्थप्रतिभासनेन भ्रान्तेः सामर्थ्य
२० विचार्य तदुत्पत्तिमाह एतत्तदन्धकारं यद्भावेष्वन्धकारतया आत्मानतिरिक्तेष्वपि भवत्यनात्माभि
मानोयं ३ एतत्तदन्धकारमिति एषामामनेनेतरप्रतिपादिता विश्वमोहिनी सा ख्यातिरूपा भ्रान्तिः
20 यद्भावेषु प्रमातृप्रमेयरूपेषु विश्ववृत्तिषु पदार्थेषु प्रकाशमानतयेति नाप्रकाशप्रकाशत इति
प्रकाशमानतान्यथानुपपत्त्या प्रकाशशरीरभूतेषु आत्मनश्चैतन्यमहेश्वरादप्यनर्थतेषु सत्स्वपि
योयमतिरेकेणामीभावा ग्राह्या वा [illegible] मनोभिन्ना अप्येवमनात्माभिमानः वास्तवचिद्रूपतापहस्तेन
नयन्तेषु अवास्तवेऽज उत्पादने [illegible] मायायः भावप्रकाशने अन्यस्याप्रकाशरूपस्य बाह्यवासना
हेतोरनुपपद्यमानत्वात्स्वात्मप्रकाश एव स्वतन्त्रो यो नीलसुखादिनाप्रकाशत अतः प्रमातृप्रमेयत
पतया चिन्मयरूपोहमेव प्रकाश इति यद्वास्तवेन रूपेतन्न प्रकाशते केवलमेव अवास्तवो भेदः प्रथत इति ता
त्त्विकप्रथनाभावाद्ध्यानेऽन्धकारेण रूपणमिति ३ आत्मन्यनात्माभिमान एवं अनात्मन्यात्माभि
मानो भवतीति प्रतिपादयन्भ्रान्तेः सुतरां मोहरूपतामाह तिमिरादपि तिमिरमिदं गाढं स्यापरिम
द्धानस्फोटः यदनात्मन्यपि देहप्राणादावात्ममानित्वं ४ आदौ तावदेकस्मिंस्तत्त्वेष्वपि भावेषु भे २
संविद् दमयं

त्माऽऽपादनमख्यातितिमिरेण कृते यस्यात्मनो भिन्नानां भावानां नानतो भेदेन प्रवणः अत एव ति
मिरमिव तिमिरमख्याति यथा एकोऽपि चन्द्रस्तद्व्यस्य नेरख्यातिमिरेण द्विधा भासते द्वौ चन्द्राविति न
चैव स ख्यातितिमिरमेकमपि सर्वस्यात्मवस्तु स्वरूपभेदेन अनात्मरूपं सकाशितवत् एवमेक
स्मिन्नख्यातितिमिरे स्थिते तिमिरमपरमायातं महामोहो यमापतितः गेहस्यापरि गेहकोऽद्भव स्व
यदस्यात्मपदं क्षितं चित्स्वरूपे स्वापि विस्मृत्तिषु पदार्थेषु आत्ममापादितेषु मध्याद्‌ने व्यतिरिक्ते जडे १॰
देहप्राणादौ वेद्यखण्डे क्वचिदेहस्य लोदं दभिनोदं स्वस्मिन् न किंचिदहमिति प्रमातृतया अना
त्मभूते आत्ममानित्वमतद्रूपेतादृप्य प्रतिपत्तिः एतदतिविषमं यदि तावदात्माभिमानेन न विना
त्वा॰ नैवं सममस्ति तन्नीलसुखादिष्वपि स्तु मा वा कुत्रापि भूत् यत्पुनः कतिपये जडे लोष्टप्राये देहा
दौ आत्मतया अहंतारमाभिषेको ऽन्यत्र नीलसुखादौ इदंतया अनात्मत्वप्रतिपादनं एष एव रणः
संसारशोचनीयः यदभिमानोपनते सुखदुःखादिद्वीतः कर्षति पश्यन्निति यदुक्तं मार्कण्डेयपु
राणे योगिन्यामदालसया यानेस्थितो यानगतश्चेदेहोऽदेहेऽपि चान्यः पुरुषो प्रविष्टः ममत्वमु
र्वीनतथा यथा स्वेदेहे तिमात्रेन वमुच्छते षा इति २। एवमख्यातिवशान्निष्प्यात्मविकल्पे रिस्य

प॰ टी माात्मानं च प्रातीत्याह देहप्राणविमर्शनधीज्ञाननभःप्रपंचयोगेन आत्मानं वेष्टयते चित्रं जाले
नजालकार इव च ॥ आत्मोपहसितचैतन्यः सर्वः प्रमाता स्वोत्थैर्विकल्पनिगडैः व्यापकमप्या
२१ त्मानं वेष्टयते कथमित्याह देहादि देहप्राणयोर्विमर्शनं धियो ज्ञानं नभसः प्रपंचो विस्तारः तद्यो
21 गेन देहादिविकल्पसंबंधेन यथा हृष्टः स्थूलः रूपवान् एवं इत्यस्मामीति बालाङ्गनाः पाम ह
रास्वेषु स्वेन विकल्पेन देहमात्मत्वं प्रतिपन्नाः केचिद्विवेकम्मन्याः देहस्तावद्देहे प्रलीयते अतो निप्रा
प्राणात्मत्वं प्रतीयः क्षुधितः पिपासितः सोहमित्यात्ममानिनस्य विवेकमन्यतराः देहप्राणयोर्ज
डैलोष्टादिवत् अतोनयोरात्मभावः नतः सुख्येहं दुःख्यहमितियः सुखदुःखादि चेतते स आ
त्मेति बुद्ध्यहंकमानिनः मीमांसकादयोपि विवेचकतमास्य एतत्सुखाद्यपि बुद्धिधर्मः कथमा
त्मतयावक्तुं शक्यः ततो देहप्राणधीविकल्पानां यत्राभावः स आत्मा इति शून्यात्ममानिनः ए
वं यत्किंचिद्दृष्टं भाति तन्नाहमिति मम यथार्थं शून्यमेव सर्वोपोहनस्वभावमात्मा इति नभः शब्दे
नोक्तः तदपि शून्यं यदा सावधानावसरे वेद्यीभवते एतदपि शून्यं वेद्येन भवामस्तदा शून्या २१
तरमात्मत्वेनावस्थिताः नेति नेतीति वृत्त्या वाद्यभ्युपगतं तत्तच्छून्यपरित्यागेन तोतोशून्यात्म
तो

परिग्रहणमित्येतीति नमः प्रपंचः कारिकायां निरूपितः इत्थं संवित्स्वरूपापर्यवसानाद्धन्यात्मसा
मिनो योगिनः स्वस्वरूपविदो निमग्नाज्ञ आत्मानो ध्याता एव आत्मानं संवित्स्वरूपमपि ज्ञात्वा नानुबध्नाति
चित्रमिति आस्वयमेतत् यदुक्तं तद्धि एवमेव स्वयंकृतमपीहते इत्यत्र दृष्टान्तमाह जालेनेत्यादि
यथा जालकारः कश्चिन्नाभिविवरविनिर्मितेन स्वेनैव जालमावरणं निर्माय सर्वतो गतिमात्मनो
वेष्टयते स्वात्मनिधनायैव भाति तथा च बोद्धा: स्वात्मनि परमतः स्वपरविभागात्
ग्रहेद्वेषौ अनयोः संप्रतिपत्तौ सर्वे दोषाः प्रजायन्ते इत्याह ॥ २२ कथमेषु निर्वाणो महामोहो
देहादिसमात्मतासमर्थः प्रलीयते भगवत्त्वात् अमेवात्र देहोरित्याह स्वज्ञानविभवभासनयो
गेनोद्वेष्टयेन्निजात्मानं इति बंधमोहनविज्ञाकीर्णमतनोति परमशिवः ॥ २३ समस्त आत्मनश्च
तन्मूलत्वात् अस्य यत्तानेस्वस्वातंत्र्यागमः तस्य विभवो देहाद्यभिमानविगलनेन यच्चित्स्वरूपप
रिहृता च मत्यात्मरूपस्य स्वातंत्र्यमस्फीतत्वं चित्पतिनैवैकेन: स्वसंवेद्योस्मीति तत्स्वबोधस्वातंत्र्य
रूपस्य विभवस्य भासनं प्रकाशः सर्वो ममायं विभव इति बाह्यतयाभिमतस्य सर्वस्य स्वात्मनि

स्वीकारः तस्य योगः एवं परिशीलनक्रमेण आत्मनि यद्धिमर्शदार्ढ्यं एवमेतेन स्वज्ञानविभव
भासनयोगेन निजमात्मानं नान्यत उपनतं येन त्यस्वभावमेहेहेष्यते देहप्राणपुर्यष्टकशून्य
परामर्शानिगडैः यो वेष्टित आसीत् तमेव चैतन्यस्वरूपः स्वतेजोऽस्मि बोधोऽस्मीति विमर्शेन
पुनरपि भगवानेव विगतवेष्टनं कुरुते रश्मिभ्रमस्थानिवलादागतेः स्वात्मनोदेहप्राणावरणा
तत्पुनरपि ख्यानबलाद्धिनश्यतीति स्वविकल्पितं रथ्यान्तेवात्ति श्रीमत्कूर्थहतात्तेत्रमारेति
रूपिते योनिश्चयः पशुजनस्य जडोऽस्मि कर्मसंपादितोऽस्मि मलिनोऽस्मि परेरितोऽस्मि इत्येत
दन्यदृढनिश्चयलाभमिथ्याम्रयपतैर्भवति विश्ववपुश्चिदात्मा इति किमिति बध्नाति
मुंचति च भगवानित्याह इति बंधेत्यादि इति प्राकृपतिपादितेन क्रमेण भगवान्स्वतंत्रः पर
मशिवः पूर्णचिदानंदैकघनलक्षणः स्वरूपगोपनस्वतंत्रः क्रीडाशीलत्वात् अख्यात्यवभा
सनपूर्वं स्वात्मानमेव देहादिप्रमातृतापन्नं विधाय स्वरूपप्रच्छादनं च बंधं विदधाति तथै
व पुनः स्वेच्छातः स्वात्मज्ञानप्रकाशनक्रमेण देहादिप्रमातृताबंधं निवार्य स एव तं स्वा
त्मानं मोचयतीत्युभयथा बंधमोक्षविचित्रां संसारापवर्गस्वरूपामैश्वर्यमयीं क्रीडां खेलां प्रतनो २२
ति

चेतनोस्मि कर्मान
धीनोस्मि निर्मलो
स्मि स्वतंत्रोस्मीति
निश्चयः

विस्तारयति एकाकी न रमाम्यहमिति निजस्वभाव एवैष देवस्य यत्तां तामप्यवस्थामापन्नः स्वरूपरू
पः सन्सर्वज्ञानुभवितृतया प्रथते इत्येतद्देवस्यातत्त्वं ३३ न केवलमेतावदेव यावत् परः कश्चिद्देवस्या
विशेषः स्वस्मिन्नेव विश्वात्म एवावभासते भगवता इत्याह सृष्टिस्थितिसंहारा जाग्रत्स्वप्नौ
सुषुप्तमिति तस्मिन् भान्ति तुरीये धामनि तथापि तैर्नावृतं भाति ३४ विश्वापेक्षया ये सर्गादयो
मायाप्रमातृगता ये जाग्रदादयः अवस्थाविशेषास्ते उभयेऽप्येतस्मिन्भगवति स्थानेदधने
तुरीये धामनि चतुर्थे पूर्णाहन्तामये पदे भाति न हि संततास्ततः स्वरूपसत्ताकल्पितप्रमात्ररूप
तयाबास्त्वतयालभन्ते परमेश्वरभित्तौ यत्नु प्रकाशन्ते तत्र तात्तथापि न प्रकाशन्ते अतस्त्वितु
तंतुवदनु स्यूतं चतुर्थे तैलवदसेच्यमिति सर्वास्ववस्थासु तुरीयं रूपमनुस्यूतं तेन स्थितमिति परमार्थः एताव
तानत्रैतैः स्वरूपमाच्छादितं स्यान्नैवेत्याह तथापि तैर्नावृतं भातीति सत्यमपि तैः स्वरूपसत्तार्थ
माहृतमपि तेभ्यः समुत्तीर्णतया सर्वानुभवितृतया सर्वत्रावभासत एव न पुनस्तदावरणेन
पूर्णस्वरूपतां तत्र तिरोधत्त इति शिवधाम सर्वास्ववस्थास्वपि सदैव पूर्णं ३५ वेदान्तभाषाभि
र्जाग्रदादीनां त्रयाणां स्वरूपं व्यवहरंस्तदनुस्यूतमपि ततः परं तुरीयमावेदयति जाग्रद्विश्वं

प-टी. भेदात्स्वप्नतैजसः प्रकाशमाहात्म्यात् प्राज्ञः स्वभावस्यात्मानन्दमत्वात्ततः परं तुर्यं ॥५॥ जाग्रदवस्थाप
न्नविश्वं ब्रह्मणो वैराजं स्वरूपं तत्र भेदात् शब्दादिविषयपंचकस्य बाह्यतया परमेश्वरसृष्टस्यैव स
२३ र्वप्रमातॄणां चक्षुरादीन्द्रियप्रवृत्तेर्विषयैकस्यैव ब्रह्मणो विषयविषयिभावेन स्थितस्य नानाइन्द्रिय
23 ज्ञानवैचित्र्यं अत एव शिवसूत्रे ज्ञानं जाग्रदिति एषा ब्रह्मणो विराडवस्था गीयते यच्छ्रुतिः
यो विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् संबाहुभ्यां नमते सं पतत्रैः
द्यावापृथिवी जनयन्देव एक इति तथा स्वप्नतैजसावस्था ब्रह्मणः उत इत्याह प्रकाशमाहा
त्म्यादिति स्वप्ने बहिष्करणानि शब्दादौ विषये नावभासगल्भंते नापि तत्र बाह्यं शब्दादिकं
नाम किंचित्परमार्थसद्विद्यते नापि बाह्यतयाध्यवसायस्याविद्यादि किंचिद्भिन्नमभिन्नं वा क सर्वं
रणांतरमुपलभ्यते भ्रमाविचार्यमाणे वापपद्यते अथ च स्वप्ने प्रकाशते अत इदमर्थादायातं
यत्स एव भगवान् स्वस्वभावो देवस्तत्स्वमात्रतासमाविष्टः स्वमायमानः स्वात्मानमेव प्रका
शयन्ते आकूहनगरजलादि अनेकप्रमातृवैचित्र्यतया रूपप्रविभज्य प्रतिप्रमातृस्वप्नसाधा
रणमेव विश्वं प्रकाशयत्येवेति ब्रह्मणः स्वातंत्र्यमेवं ब्रह्मवादिभिरभ्युपगतं यतो वेदांते २३

ष्विदमन्ते प्रविभज्यमानानामनन्ताभावान्तर्पनश्चिपाम् सर्वेश्वरः सर्वमयः स्वेमेभो
न्नाप्रकाशते इति प्रकाशमानात्मैवाद्वैते तु अतः स्वेमोऽब्रह्मणि लीनो वस्थ्यति तथा
प्राप्तास्वभावस्थेति सर्वप्रमातृणां स्वभावस्यास्वभूमेस्सामान्य इति ब्रह्मणः प्राप्तावस्थे
ति यतः सर्वप्रमातृणामात्मानामेकप्रपञ्चविलयान्तद्दाप्तस्वरूपप्राप्त्यादि विलिये मं
स्कारशेषे स्वभूमेषि स्वप्रबीजस्य ब्रह्मण एव सत्ता ब्रह्मप्रतीतास्तत्प्रानन्तः सममवशिष्यत

२०

इति यावत् सर्वस्य ग्रामनमीलनवाद्वैचित्र्यप्रथायामेषां संस्कारभूमिः ततः स्व
दुस्यप्रागनुभूतवद्व्यवहारदर्शनात् अन्यथायं घस्माभूमो स्थिरं सत्तान्तस्वभावे सर्वे
शीकारेण ब्रह्मनप्रकाशते अतस्तन्तदुत्थितस्य प्रमातुः प्रागनुभूतवस्तुनस्तथैव तदित्यनु
भूतचरत्वेनस्मृतिरूपपन्नासत नाष्टिसुखमहमस्वाप्सं दुःखमहमस्वाप्सं गाढं मूढोऽहमा
समित्यनुभवः प्रादुरभविष्यदिति तथा च भट्टदिवाकरवत्सः सर्वेनुभूतापदितोऽतरथा
स्वदात्मसंस्कारस्थिता स्थः विज्ञानवनुप्रतिमोघनपकाशिस्मृतिर्नामननसंभवेतोतः
इति इत्थं स्वभूमेश्चिन्मयमेव ब्रह्मणः प्राप्तावस्थेति गीयते अतः ज्ञानघनत्वादिति स्वभूमन्

पटी॰ येयोः साधारणोयं हेतुरितुभयत्रयोजं एषा हृपुरमभूमिर्लीनत्वेनाप्रकाशमूर्तिः केवलं वि
म्यवलयतं कारेणाभामलास्तती शुद्धचिन्मयीनभवतीति यदुक्तं स्पंदशास्त्रे ज्ञानेज्ञेयस्वरू
२४ पिएपा यान्नापरमयाप्नुत: परह्येवविभुर्भाति तदन्यत्रतु चिन्मयस्पृते तथा ततः परंतुर्यमिति
२५ तस्मात्त्रपुमात्परमन्यात्रिः शेषपाशवासनासंस्कारपरिहत्याकुंडलनेदमयंब्रह्मणस्तुरीयं
रूपमनुगुणंनाम यदावसानवर्थेनकिंचिदुपपद्यते स्मतोस्मा ख्यातमावस्यात्रयस्य विश्राम
भूतं सर्वांतरतमत्वेनानुस्यूतमिति चतुः संख्यापूरणं तुर्यमिति पूरणप्रत्ययेन संख्यापदे
शात्कृतः कथमवस्थात्रयस्यानुस्यूतमिति ततः परमेतदित्याह ज्ञानत्वेनत्वादिति यतोजा
ग्रदादयोवस्थाः सर्वाभेदप्रवणत्वात्समातृणामज्ञानमय्यः तुरीयेयादृशात्कदाभमलयसं
स्कारपरिहत्याज्ञानत्वेनप्रकाशानंदमूर्ति अतस्तदंतस्थमपि ताभ्यावस्थाभ्यश्चिन्मयत्वयास
मुत्तीर्णत्वात्परमन्यदित्येवमवस्थाविचित्रं परमाहुयस्सभावं तत्त्वैस्त्रैमेव समेर्णविजृंभते॥ एव २५७
मपिस्फुरद्रूपस्य परमात्मनः सर्वप्रमातृत्वानुस्यूतत्वेनास्थितत्वाद्वश्यं प्रमातृगणगतमख्यातिमा
लिन्यमायातीति यतस्तेति वैलोतेनावेदयति जलधरधूमरजोभिर्मलिनीक्रियतेयथा २७

नगगनतले तद्वन्मायाविकृतितिमिरपरामृष्टः परः प्रकाशः २७ यद्यामेघधूमधूलीपुंजै
राकाशस्यैरप्याकाशपृष्ठममलिने स्वभावतो नमलिने विधीयते नापि नित्यतावैतत्त्वखंडना
वानीयते केवलेदर्पणप्रतिबिंबवत्तत्तदवस्थाविचित्रे गगने गगनमेव सर्वदा तथात्वेन प्रम
भित्ताना तद्वदिति नैवमायाविकृतितिमिरव्याप्तिसमस्यैर्विकारैर्नानाप्रमातृगतैर्जन्ममर
णाद्यनेकविचित्रावस्थामयैर्भगवत्स्यैरपि भगवान्नपरामृष्टः नैतैरुपहतस्वरूपः यतः स एव
परः प्रकाशः इति सर्वप्रकाशानां जीवानामाद्यउल्लासो विश्रांतिस्थानं चेति सर्वत्र भवितृत
यासदास्फुरतीति पर शब्देन निर्दिष्टः तस्मान्नस्वसमुत्थैः प्रकाशात्रूपैर्मायाविकारैरिंद्रजा
लिकवद्भगवतः काचित्क्षतिरेनेति परमेष्ठिना नरेश्वरविवेके प्युक्तं यद्यप्यर्थस्थितिः प्रा
णपुर्यष्टकनियंत्रिता जीवनिरुद्धा तत्रापि परमात्मनि सा स्थिता तदात्मनैव तस्यास्या
त्कथं प्राणनियंत्रणेति २७ नन्वेकचिन्मात्रपरमार्था अपि प्रकाशाविशिष्टसुखदुःखमो
हजन्ममरणादिनानावस्थावैचित्र्यभाजस्त्विति कथमेतदिति दृष्टांतमाह एकस्मिन्न
पि गगने रंसाव्याप्तिभवंति नानान्यानि मलिनानि तद्वदेते जीवाः सुखदुःखभेदजुषः २८

त

परमात्मन्नुपगता
परमात्मनः

[illegible]संकुचितं २ [illegible]घटाकाशं

प॰ टी यथैकस्मिन्घटाकाशे धूलिपुंजसमाच्छादिते नान्यानि घटाकाशानि विमलिनान्यपि यथा
काशत्वाविशेषान्मलिनानि रजसाच्छादितानि भवंति विमलेव्यापके नितरामपि हि गगने
२५ याहृशो घटसंकोचसंकुचिते भवेत्तादृशमेव तस्यैव घटस्य तेजो भवति न पुनः सर्वाणि घटपटा
द्याकाशानि कस्तूरीगुरुधूपितानि मृगमदाधिवासितानि रुधिरगंधीनि वैकाकाशस्वरूप
आकाश त्वात्संकीर्यंते स्वगतघटादिकृतविच्छेदात् प्रत्येकं चापि गगने वास्तवे स्थिते घटादयः स्वग
घटभित्ति तभित्तिसंकोचनियंत्रिताः संतो नानागगनवैचित्र्यं प्रथयंति इत्थं घटकृतसंकोच एव गग
नतया वशिष्यते तथात्वेनार्थक्रियाकारित्वात् न पुनर्गगनस्यैव किंचिद्घटगतं मालिन्यादि
25 स्वरूपतिरोधानाय भवति नापि परस्परं घटाद्यवच्छिन्नानां गगनानां व्यामिश्रणेति तद्वदिति
तथैवामी जीवाः शुद्धाः एकचिन्मात्रपरमार्था अपि पारमेश्वर्या मायाशक्त्यांऽशाण्वमायीय
माकृतकोशत्रयावेष्टनेन एतांव्याप्तिचिदानंदैकघनस्वरूपम पहस्त्य परिमितीकृताः येनै
कचैतन्यात्मनोपि स्वगतकोशत्रयविच्छेददोषात् परस्परं भिन्ना इवेति घटपटाद्याकाशव
त् इत्थं मायीयकोशकृतो विच्छेद एव जीवतया व्यवह्रियते न पुनः परमेश्वरेण व्यवच्छिन्न २५

चिदानंदैकघने जीवाः पृथक्षा आत्मा परमात्मा एव इति दर्शनांतरदृष्टः कश्चिद्व्यवहारः एवमाग
वादिकोशावच्छिन्ना जीवा विचित्रकर्ममलवासनाधिवासिता नानादेहा नानाशया नानापु
ण्यापुण्यस्वर्गनरकसुखदुःखजन्ममरणादिद्वंद्वभेदभाजश्च संतो नान्योन्यं संकीर्यंते य
था नानाद्रव्याधिवासितानि घटाद्यवच्छिन्नानि घटाकाशानीति सूपपन्नमेकचिन्मात्रपरमा
र्थापि स्वविच्छेदाद्दृष्टो नाभेदज्ञ एवेति २७ इत्येजीव मेउलगता अवस्थाविशेषा येते के
वलं भगवत्युपचर्यंते न पुनस्तत्त्वतस्तत्रैते केचिदित्याह प्रागेते शांतरवाय हेष्टहस्वावि
मोदवतिमूढः जगतःस्थगतो सतिभगवान्न पुनः परमार्थतः सत्या २८ जगतो इंद्रियवं
गेशांते उपरते सति तद्गतः परमात्मा शांतो नष्ट इवाभिमन्यते एवं तस्मिन्हृष्टे साङ्गादे सति
मत एवोपचर्यते परं तमोमयेमूढो मोदवानिति यथा स्थावरयोनौ न पुनः परमार्थतो
वस्तुवृत्तेन स परमेश्वरस्य यातेन प्रकारेण भवति सर्वो हि जडभागः उत्पाद्यः संहार्यो वा
भवति न पुनर्नित्ये भगवति बाधस्वभावे मायादिके चुकगते विना शोपपन्नीस्यातामिति
भगवान्सदासमः २९ सृष्ट्युत्पत्तिक्रमेणागताभ्रांतिः पुनर्नीति क्रमेण स्थतरां सम्यक्स्फूर्ति ले

